International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 173-176
© 2026 IJMH
www.themultijournal.com
Received: 28-05-2026
Accepted: 24-06-2026
Publish : 25-06-2026

**रङ्गनाथ सुधन्वन्**
अनुसन्धाता,न्यायविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपति

**Correspondence:**
**रङ्गनाथ सुधन्वन्**
अनुसन्धाता,न्यायविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपति

# महामहोपाध्याय-रामानुजताताचार्याणां गोपालसहस्रनामभाष्ये साहित्यशास्त्रप्रकर्षः

**रङ्गनाथ सुधन्वन्**

**शोधपत्रसारः-**

अस्मिन् शोधपत्रे प्रसिद्धविद्वद्भिः आचार्य रामानुजताताचार्यैः गोपालसहस्रनामस्तोत्रस्योपरि लिखितस्य भाष्यस्य विषये तेषां साहित्यशास्त्रे विद्यमानं पाण्डित्यं कीदृशमस्तीति ईषदिह प्रस्तूयते।

## 1. उपोद्घातः

संस्कृतवाङ्मयपरम्परायाम् अर्वाचीने काले ये मूर्धन्याः महापण्डिताः स्वकीयेन प्रज्ञावैभवेन चतुश्शास्त्रपारङ्गत्वेन च समग्रं भारतम् अलङ्कृतवन्तः, तेषु अग्रगण्यत्वेन विराजन्ते [1]**महामहोपाध्याय-पद्मभूषण-डॉ.-एन्-एस्.-रामानुजताताचार्यचरणाः**।

### श्रीरामानुजताताचार्याणां संग्रहपरिचयः-

तमिलनाडुराज्यस्य उत्तरार्काटुमण्डले विद्यमाने सुप्रसिद्धे वेदाध्ययनकेन्द्रे नवलपक्कमग्रामे उ.वे. एन्.एस्. कृष्णस्वामी ताताचार्यमहोदयानां गृहे जन्म प्राप्तवन्तः एते महाभागाः। पारम्परिकपद्धत्या व्याकरण-न्याय-मीमांसा-वेदान्तशास्त्रेषु परमां प्रतिष्ठां लब्धवन्तः। मद्रास् विश्वविद्यालयतः व्याकरणशिरोमणिम्, न्यायशिरोमणिम्, मीमांसाशिरोमणिम् च प्रथमश्रेण्यां समुत्तीर्य, ते अद्वितीयं प्रज्ञापाटवं प्रदर्शितवन्तः।

काशीस्थ-सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः 'विद्यावारिधि' (पीएच्.डी.) पदव्या विभूषिताः आचार्याः, राष्ट्रियसंस्कृतविद्यापीठस्य (तिरुपतिः) प्रथमकुलपतित्वेन यशस्वीं सेवां समपादयन्। अनन्तरं च [2]पॉन्डिचेरीस्थे 'फ्रेंच-इन्स्टीट्यूट' इति नामके अनुसन्धानकेन्द्रे गौरवाचार्यत्वेन जीवनस्य अन्तिमक्षणं यावत् अनुसन्धानकार्ये निरताः आसन् ।

डिजिटल्माध्यमेन, शोधमञ्चैः, तथा च **"गोपालसहस्रनाम"** इति सङ्केतितेन विवरणपत्रकेण उपलब्धसङ्केतानुसारं तेषां बहुशास्त्रज्ञतायाः महतो योगदानस्य च कृते भारतसर्वकारेण वर्षे 2016 तमे 'पद्मभूषण' इति नागरिकसम्मानः, फ्रांसदेशीयसर्वकारेण च वर्षे 2012 तमे 'शैविलियर दे ला लेजियँ द'नर' (Chevalier de la Légion d'Honneur) इति सर्वोच्चनागरिकविभूषणं प्रदत्तम्।

आचार्याणां प्रज्ञा केवलं शास्त्रार्थे एव न पर्यवसन्ना आसीत्, अपि तु सा रसभावसम्पन्ना भूत्वा साहित्यशास्त्रस्य मार्गेणापि प्रवृत्ता समभवत्। तेषां मते शास्त्राणां कर्कशता यदा साहित्यस्य माधुर्येण सह सम्बद्धा भवति, तदैव सा सहृदयानां मनसि परमं सुखं जनयति। अत एव तैः न्याय-व्याकरणादिगम्भीरग्रन्थेषु व्याख्याप्रणयनेन सह साहित्यग्रन्थानां सम्पादनम्, अपूर्वाणां काव्यानां प्रकाशश्च विहितः।

## 2. आचार्याणां साहित्यशास्त्रे रुचिः, ग्रन्थाश्च

ताताचार्यचरणानां साहित्यशास्त्रे नैसर्गिकी रुचिः आसीत्। ते जानन्ति स्म यद् भामहोक्तदिशा—

**"न स शब्दो न तद्वाच्यं न स न्यायो न सा कला।**
**जायते यन्न काव्याङ्गमहो भारो महान् कवेः॥"**[1]

इति सिद्धान्तमनुसृत्य सर्वमपि शास्त्रं काव्याङ्गतामुपैति। आचार्याणां साहित्यिककृतिषु प्रमुखाः सन्ति—

1. **रामानुजचरितचम्पूः** – अस्य अनुपमस्य चम्पूकाव्यस्य परिष्कृतं सम्पादनं विधाय तैः स्वकीयम् अलङ्कारशास्त्रनैपुण्यं प्रकटीकृतम्।

2. [3]**ज्ञापकसङ्ग्रहस्य 'विवृतिः' व्याख्या** – व्याकरणगता सा व्याख्या साहित्यशास्त्रानुकूलशब्दशक्तिप्रकाशने साहाय्यं करोतीति पाठ्यग्रन्थत्वेन मान्यतां प्राप्ता ।

**3.[4]भाट्टतन्त्ररहस्यग्रन्थस्य 'सारप्रकाशिका' व्याख्या –** मीमांसा-ग्रन्थोऽपि अयं वाक्यविन्याससौन्दर्येण साहित्यिकप्रौढिमुपैति।

4. **भगवद्गुणरत्नपेटिका –** तिरुमल-तिरुपतिदेवस्थानद्वारा वर्षे 1976 तमे प्रकाशितेयं व्याख्या गोपालसहस्रनामस्तोत्रस्य अपूर्वं साहित्यशास्त्रीयं भाष्यं वर्तते। अस्मिन् आचार्याः प्रत्येकस्य नाम्नः व्याकरणगतां निरुक्तिं प्रदर्शयन्तः, रस-अलङ्कार-ध्वनि-गुणादीनां साहित्याङ्गानां सन्निवेशं कृतवन्तः, येन ग्रन्थोऽयं रसार्द्रं दिव्यकाव्यमिव प्रतीयते।

### 3. गोपालसहस्रनामभाष्यस्य साहित्यिकं वैशिष्ट्यम्

गोपालसहस्रनामस्तोत्रं संमोहनतन्त्रात् सङ्गृहीतम् अस्ति। यत्र शिवपार्वत्योः सम्वादात्मिका पीठिका दरीदृश्यते। आचार्याणां व्याख्या 'भगवद्गुणरत्नपेटिका' इति नाम्नैव स्वकीयमन्वर्थकत्वं प्रकटयति। यतो हि भगवतः कल्याणात्मकाः गुणाः एव रत्नानि, तेषां सुरक्षितस्थानरूपेण मञ्जूषा इव इयं व्याख्या वर्तते। भाष्येऽस्मिन् आचार्याः पाणिनीयव्याकरणस्य नियमान् संरक्षन्तः, कथम-लङ्कारसिद्धान्ताः रसपरिपोषाय उपयुज्यन्ते इति सुस्पष्टं निरूपितवन्तः। ग्रन्थस्य गद्यविन्यासः न केवलं दार्शनिकं चिन्तनं प्रस्तौति, अपि तु रसिकानां चेतश्चमत्कारकारि साहित्यशास्त्रीयं वैभवमपि दरीदृश्यते।

### 4. श्लोकानां (1 तः 23) क्रमिकं गभीरं साहित्यिकं विवेचनम्

अत्र गोपालसहस्रनामस्तोत्रस्य पीठिकाभागाद् आरभ्य मुख्यनामभाष्यं यावत् आचार्याणां व्याख्यादृष्टेः श्लोकवारं गभीरं विवेचनं सङ्केतपूर्वकं प्रस्तूयते—

**श्लोकः १ – कैलासशिखरे रम्ये...**

**कैलासशिखरे रम्ये गौरी पृच्छति शङ्करम्।**
**ब्रह्माण्डाखिलनाथस्त्वं सृष्टिसंहारकारकः॥**[2]

अस्मिन् मङ्गलाचरणात्मके श्लोके पार्वतीशङ्करयोः संवादस्य उपस्थापनं कृतं वर्तते। आचार्याः 'रम्ये' इति पदस्य व्याख्याने 'रमणीये मनोहरे' इति कथनेन काव्यस्य उद्दीपनविभावत्वेन कैलासशिखरस्य सौन्दर्यं प्रकटीकुर्वन्ति। रसशास्त्रसम्मतरीत्या यत्र शृङ्गारस्य शान्तस्य च रसस्य समञ्जसः सन्निवेशो भवेत्, तत्रैव चित्तस्य एकाग्रता जायते। 'शङ्करम्' इति पदस्य 'सर्वसुखकरं शिवम्' इति व्याख्यानेन शान्तरसस्य स्थायीभूता 'शम' चित्तवृत्तिः व्यञ्जनाशक्त्या द्योतिता भवति। 'गौरी' इति पदं न केवलं पार्वतीमात्रवाचकम्, अपि तु राधायाः गौरतेजसः सङ्केतरूपेण उत्तरत्र प्रतिपाद्यमानाय अभेदसिद्धान्ताय पीठिकां रचयति। आचार्याः व्याकरणगतां प्रक्रियां प्रदर्शयन्तः '[5]लकारव्यत्यय आर्षः, वर्तमानसामीप्याद्वा वर्तमानवल्लकारः' इति कथनेन व्याकरणौचित्यं रक्षन्तः काव्यस्य रसप्रवाहं न बाधन्ते ।

**श्लोकः 2 – त्वमेव पूज्यसे लोकैः...**

**त्वमेव पूज्यसे लोकैर्ब्रह्मविष्णुसुरादिभिः।**
**नित्यं पठसि देवेश कस्य स्तोत्रं महेश्वर॥**[3]

अत्र पार्वत्याः मनसि समुत्पन्नस्य जिज्ञासाभावस्य साहित्यिकं रूपं दृश्यते। 'महेश्वर' इति पदस्य व्याख्याने 'महांश्चासौ ईश्वरश्च महेश्वरः' इति विग्रहं प्रदर्श्य 'महेश्वरशब्दः परमशिवे योगरूढ इत्याहुः' इति यदाचार्यैः प्रतिपादितं, तेन काव्यगतः साभिप्रायविशेषणताप्रयुक्तः **परिकरालङ्कारः** सिद्धो भवति। 'देवेश' इति सम्बोधनेन देवानामधिपतित्वं प्रदर्श्य कस्य स्तोत्रपठनं क्रियते इति विरोधाभासाभासः स्फुरति। आचार्याः स्तुतेः प्रयोजनं निरूपयन्तः वदन्ति— '[6]कस्यचित् गुणकीर्तनरूपा स्तुतिर्हि स्तुत्यस्य प्रसादद्वारा किंचित्फलमुद्दिश्य भवति' । अत्र यस्य शिवस्य प्रसादं सर्वे काङ्क्षन्ति, तेन शिवेन कस्य स्तुतिः क्रियते इति कथनेन **काव्यलिङ्गालङ्कारस्य** ध्वनिः स्फुरति, यः रसिकानां बुद्धिं विस्मये मज्जयति।

**श्लोकः 6 – आश्चर्यमिदमाख्यातं...**

**आश्चर्यमिदमाख्यातं जायते मयि शङ्कर।**
**तत्प्राणेश महाप्राज्ञ संशयं छिन्धि मे प्रभो॥**[4]

अस्मिन् श्लोके विस्मयनामकस्य स्थायीभावस्य परिपोषणं कृतम् अस्ति, यः अद्भुत रसस्य अङ्गत्वेन विराजते। आचार्याः 'प्राणेश' इति पदस्य 'मत्प्राणनाथ! त्वत्सन्निध्यधीनो मम प्राण इति भावः' इति रसिकं व्याख्यानं कुर्वन्तः पार्वत्याः शिवं प्रति अनन्यप्रेमभावलक्षणं शृङ्गारस्यानुभावं प्रकटयन्ति। 'महाप्राज्ञ' इत्यस्य 'प्रकर्षेण जानातीति प्रज्ञः, प्रज्ञ एव प्राज्ञः, महांश्चासौ प्राज्ञश्च महाप्राज्ञः' इति शब्दव्युत्पत्त्या व्याकरणशरणं गच्छन्तोऽपि ते काव्यस्य शब्दवैचित्र्यं वर्धयन्ति। संशयोच्छेदस्य या प्रार्थना अत्र दृश्यते, तत्र विबोधनामकस्य व्यभिचारिभावस्य सुन्दरी योजना विरचिता अस्ति।

**श्लोकः 4 – धन्यासि कृतपुण्यासि...**

**धन्यासि कृतपुण्यासि पार्वति प्राणवल्लभे।**
**रहस्यातिरहस्यं च यत्पृच्छसि वरानने॥**[5]

शिवस्य वचने पार्वत्याः प्रशंसा वर्तते। आचार्याः 'प्राणवल्लभे' इत्यस्य 'प्राणेश्वरि, प्राणवत् प्रिये इति वा' इति रसात्मकं निर्वचनं कुर्वन्ति। 'वरानने' इति सम्बोधनस्य 'उत्कृष्टवदने' इति सामान्यार्थं दत्त्वा, तत्क्षणमेव 'भगवन्माहात्म्यश्रवणोत्सुक्यसञ्जात-शोभातिशय-युक्तवदने इति वा' इति यत् द्वितीयं व्याख्यानं विरचितं, तत् काव्यशास्त्रीयप्रतिभायाः प्रकृष्टं निदर्शनम् अस्ति।

भगवद्भक्तेः श्रवणेन वदने या शोभा जायते, सा सात्त्विकभावस्य परिणामभूता इति मत्वा रसपरिपोषाय अतीव साहाय्यं करोति। 'रहस्यातिरहस्यम्' इत्यत्र पुनरुक्तिदोषं निवारयन्तः आचार्याः '[7]रहस्येषु गोपनीयेषु अतिरहस्यं अत्यन्तगोपनीयं' इति कथनेन रहस्यस्य महत्त्वं सूचयन्ति ।

**श्लोकः 5 – स्त्रीस्वभावान्महादेवि...**

**स्त्रीस्वभावान्महादेवि पुनस्त्वं परिपृच्छसि।**
**गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः॥**[6]

गोपनीयतायाः दृढीकरणाय अत्र गोपनीयमिति पदं त्रिवारं प्रयोगः कृतः । आचार्याः अस्य साहित्यिकं रहस्यं प्रकटयन्तः वदन्ति— '[8]त्रिवारं गोपनीयशब्दप्रयोगः गोपनीयत्वस्य वास्तवत्वसूचकः' । अत्र पुनरुक्तिदोषः न भवति, अपि तु आदरवशात् गुणत्वमेव प्राप्नोति। एतदर्थं तैः महाभारतादिप्रसिद्धा 'सत्यं सत्यं पुनस्सत्य-मुद्धृत्य भुजमुच्यते' इति कारिका उदाहृता। विशेषतः आचार्याणां साहित्यमर्मज्ञता तदा प्रकाशते यदा ते वाल्मीकिरामायणस्य अरण्यकाण्डस्थां सीतायाः उक्तिम्—

**"स्त्रीचापलादेतदुदाहृतं मे धर्मं च वक्तुं तव कः समर्थः।"**[7]

इति संवादित्वेन उपस्थापयन्ति। ईदृशं काव्यसाम्यप्रकटनं केवलं तस्यैव सम्भवति यस्य साहित्ये बहुधा अभ्यासः भवेत्। अत्र पार्वत्याः प्रश्नस्य औचित्यं स्त्रीस्वभावजन्यं मत्वा अपि तस्याः पातिव्रत्यमयी भक्तिः व्यञ्जनाशक्त्या प्रकटीकृता वर्तते।

**श्लोकः 6-7 – दत्ते च सिद्धिहानिः...**

**दत्ते च सिद्धिहानिः स्यात्तस्माद्यत्नेन गोपयेत्।**
**इदं रहस्यं परमं पुरुषार्थप्रदायकम्॥**[8]
**धनरत्नौघमाणिक्यं तुरगं च गजादिकम्।**
**ददाति स्मरणादेव महामोक्षप्रदायकम्॥**[9]

अनयोः श्लोकयोः फलश्रुतिप्रसङ्गे आचार्याः ऐहिक-पारलौकिक-फलानां विवेकं कुर्वन्ति। 'महामोक्षप्रदायकम्' इत्यत्र 'महत्' इति विशेषणस्य सार्थकतां प्रतिपादयन्तः ते कथयन्ति— 'स्वात्मप्राप्ति-रूपकैवल्याख्यमोक्षस्य व्यावृत्तये महदिति विशेषणम्'। अत्र विशेषणस्य साभिप्रायत्वात् **परिकरालङ्कारः** पुनः स्फुरति। गद्यभागे सरला सरसा च वैदर्भी रीतिः प्रयुक्ता अस्ति, येन प्रसादाख्यः काव्यगुणः झटिति अर्थप्रतीतिं कारयति।

**श्लोकः 8-9 – तत्तेऽहं संप्रवक्ष्यामि...**

**तत्तेऽहं संप्रवक्ष्यामि शृणुष्वावहिता प्रिये।**
**योऽसौ निरञ्जनो देवः चित्स्वरूपी जनार्दनः॥**[10]
**संसारसागरोत्तारकरणाय नृणां सदा।**
**श्रीरङ्गादिकरूपेण त्रैलोक्यं व्याप्य तिष्ठति॥ 9॥"**[11]

अत्र भगवतः सर्वव्यापकत्वकथने आचार्याणां शब्दशक्तिविवे-चनपरता साहित्यानुकूला वर्तते। 'जनार्दनः' इति पदस्य व्याख्याने तैः व्युत्पत्तिद्वयं प्रदर्शितम्—

1. "जनान् अर्दयतीति जनार्दनः (प्रतिकूलजनानां अर्दयिता नरका-दिगमयिता)" – अत्र शमदमादिगुणरहितानां कृते भयानकरसो-चितः भावः व्यज्यते।
2. "अनुकूलजनैः स्वाभिलषितमर्धमानः याच्यमान इत्यर्थः" – अत्र भक्तजनानां कृते वात्सल्य-भक्तिभावयोः परिपोषो भवति।

अत्र 'अर्द गतौ याच्ञायां च' इति धातोः अर्थद्वयमादाय तैः यादृशं पाण्डित्यं प्रदर्शितं, तेन श्लेषालङ्कारस्य ध्वनिमूलकत्वं सिध्यति। '[9]संसारसागर' इत्यत्र 'संसाराख्यसमुद्रात्' इति कथनेन रूपकाल-ङ्कारस्य प्रयोगचातुर्यं सुस्पष्टं भवति ।

**श्लोकः 10-11 – ततो लोका महामूढा...**

**ततो लोका महामूढा विष्णुभक्तिविवर्जिताः।**
**निश्चयं नाधिगच्छन्ति पुनर्नारायणो हरिः॥**[12]
**निरञ्जनो निराकारो भक्तानां प्रीतिकामदः।**
**वृन्दावनविहाराय गोपालं रूपमुद्वहन्॥**[13]

साहित्यशास्त्रे श्रीकृष्णः रसराजत्वेन राराजते। आचार्याः 'निराकारः' इत्यस्य 'प्राकृताकाररहितः' इति व्याख्यां कृत्वा 'गोपालं रूपमुद्वहन्' इत्यस्य तात्पर्ये वदन्ति यद् भक्तानां भजनासौकर्यायैव भगवान् दिव्यमङ्गलविग्रहं धारयति। अत्र भक्तिरसस्य आलम्बनविभावत्वेन श्रीकृष्णस्य रूपं निरूपितम्। 'वृन्दावन-विहाराय' इति पदेन उद्दीपनविभावस्य सुन्दरा योजना कृता अस्ति, यतो हि वृन्दावनं रसोत्पत्तौ परमं सहायकं भवति।

**श्लोकः 12-13 – मुरलीवादनाधारी...**

**मुरलीवादनाधारी राधायै प्रीतिमावहन्।**
**अंशांशेभ्यः समुन्मील्य पूर्णरूपकलायुतः॥**[14]
**श्रीकृष्णचन्द्रो भगवान् नन्दगोपवरोद्यतः।**
**धरणीरूपिणीमातृयशोदानन्ददायकः॥**[15]

अस्मिन् भाष्यभागे आचार्याणां साहित्यशास्त्रीया दृष्टिः चरमां सीमां स्पृशति। 'राधा' इति पदस्य व्युत्पत्तिं कुर्वन्तः ते कथयन्ति— 'राध्यते आराध्यते श्रीकृष्णप्राप्त्यर्थं सर्वैरिति राधा, तदाराधनं विना कृष्णप्राप्तेर्दुर्लभत्वात्। राध्यते वशीक्रियते श्रीकृष्णेनेति वा राधा'। इयं व्याख्या उज्ज्वलनीलमणिमहोदधौ उक्तां महाभावस्वरूपायाः राधायाः स्थितिं साक्षात् कारयति। अत्र शृङ्गाररसस्य परा कोटिः अस्ति। तथैव 'श्रीकृष्णचन्द्रः' इत्यत्र 'चन्द्रसदृशः श्रीकृष्णः श्यामसुन्दरमूर्तिः' इति कथनेन उपमालङ्कारस्य सौन्दर्यं प्रकटी-कृतम्। 'आनन्ददायकः' इत्यस्य व्याख्याने 'स्वकीयबाल्यचेष्टितैः आनन्दप्रदाता' इति यद् उदीरितं, तेन साहित्यशास्त्रसम्मतस्य वात्सल्यभावस्य अपूर्वः परिपाकः सञ्जातः। आचार्याणां गद्यशैली अत्र नितरां मधुरा, ओजोगुणयुक्ता च वर्तते।

**श्लोकः 14-15 – द्वाभ्यां प्रयाचितो नाथो...**

**द्वाभ्यां प्रयाचितो नाथो देवक्यां वसुदेवतः।**
**ब्रह्मणाभ्यर्थितो देवो देवैरपि सुरेश्वरि॥**[16]
**जातोऽवन्यां मुकुन्दोऽपि मुरलीवेदरेचिका।**
**तया सार्धं वचः कृत्वा ततो जातो महीतले॥**[17]

अस्मिन् व्याख्याप्रसङ्गे आचार्याणां काव्यशास्त्रीयौचित्यदृष्टिः परां कोटिमनुसरति। श्रीमद्भागवतोक्तकथानां सन्दर्भे **'त्वमेव पूर्वसर्गेऽभूः'**[18] इति श्लोकमुद्धृत्य तैः यादृशं काव्यसाम्यं प्रदर्शितं, तत् महाकाव्योचितं वस्तुसङ्गठनं सूच्यते। विशेषतः पाठान्तर-समीक्षाप्रसङ्गे 'मुरलीवेदरेचिका' इत्यस्य 'वेदात् स्वरूपज्ञानात् रेचिका वियोजिका प्रच्याविका या मुरली योगमाया' इति यद् व्याख्यानं कृतं, तत्र साहित्यशास्त्रोक्ता 'योगमाया' एव रसपरिपाके साहाय्यं करोतीति रहस्यं प्रकटितम्।

'[10]मुर संवेष्टने' इति धातोः आधारेण 'मुरः मोहः' इति कृत्वा 'तं लाति ददातीति' इति या निरुक्तिः कृता, सा काव्यप्रकाशोक्तां शब्दार्थमर्मज्ञतां द्रढयति। 'मुरलीवादरोचकः' अथवा 'मुरलीवादने-च्छया' इति पाठान्तराणाम् अन्वेषणचातुर्येण आचार्याणां पाठसमीक्षात्मकं साहित्यशास्त्रकौशलं सुस्पष्टं प्रकाशते। अत्र शृङ्गाररसस्य उद्दीपनत्वेन वेणुनादः प्रतिष्ठापितो भवति।

**श्लोकः 16 – संसारसारसर्वस्वं...**

**संसारसारसर्वस्वं श्यामलं महदुज्ज्वलम्।**
**एतज्ज्योतिरहं वेद्यं चिन्तयामि सनातनम्॥**[19]

अस्मिन् श्लोके रसराजस्य श्रीकृष्णस्य श्यामसुन्दरविग्रहस्य यद् वर्णनं वर्तते, तत्र आचार्याणां लेखनी गद्यात्मिका सती अपि काव्यात्मकं चमत्कारं जनयति। 'संसारसारसर्वस्वं' इत्यस्य 'संसारे प्रकृतिमण्डले साररूपं सर्वस्वं' इति विवृण्वन्तः ते काव्यालङ्कारसम्मतं

परिकरालङ्कारं साभिप्रायविशेषणद्वारा स्थापयन्ति। 'श्यामलम्' इति विग्रहे 'नीलमेघवत् श्यामवर्णयुक्तम्' इति कथनेन उपमालङ्कारस्य छाया दृश्यते। अत्र 'महदुज्वलम्' इति पदेन शृङ्गाररसस्य उज्वलत्वं प्राधान्येन व्यज्यते, यतो हि [11]आलङ्कारिकसमये शृङ्गार एव उज्वलसंज्ञया प्रसिद्धो वर्तते। 'एतज्ज्योतिः' इत्यस्य 'राधाकृष्णाख्यं तेजः' इति यदाचार्यैः व्याख्यातं, तदा रूपकालङ्कारस्य उत्तमा स्थितिः अनुभूयते।

**श्लोकः 17-18 – गौरतेजो विना यस्तु...**

**गौरतेजो विना यस्तु श्यामतेजस्समर्चयेत्।**
**जपेद्वा ध्यायते वापि स भवेत् पातकी शिवे॥**[20]
**स ब्रह्महा सुरापी च स्वर्णस्तेयी च पञ्चमः।**
**एतैर्दोषैर्विलीयेत तेजोभेदान्महेश्वरि॥**[21]

साहित्यशास्त्रदृष्ट्या अयं भागः अतीव महत्त्वपूर्णः अस्ति। अत्र रसभेदस्य निषेधः कृतः अस्ति। आचार्याः 'तेजोभेदात्' इत्यस्य 'तेजसः विभजनात् पृथक्करणाद्धेतोः' इति कृत्वा इत्थं वदन्ति— '[12]अविभक्ततेजोयुगलरूपं श्रीराधासमेतकृष्णं भित्त्वा केवलश्रीकृष्णस्य यः पूजादिकं करोति स पञ्चमहापातकदोषैर्लिप्येत', तेन रसशास्त्रस्य अद्वितीयत्त्वं प्रतिपादितं भवति। काव्ये अत्र शृङ्गाररसस्य पूर्णता भवति, अत्र आलम्बनद्वयस्य (आश्रय-विषययोः अर्थात् राधाकृष्णयोः) समञ्जसः सन्निवेशः आवश्यको भवति। एकस्य त्यागे रसभङ्गः भवति इति याज्ञवल्क्यस्मृतेः 'ब्रह्महा मद्यपः स्तेनः' इति श्लोकमुद्धृत्य साहित्यगत-दोषविवेचनपद्धत्या गम्भीरं महावाक्यं निर्मितम्, यत् आचार्याणां बहुशास्त्रगामित्वं साहित्यरसिकत्वं च दृढयति।

**श्लोकः 19-20 – तस्माज्ज्योतिरभूद्द्वेधा...**

**तस्माज्ज्योतिरभूद्द्वेधा राधामाधवरूपकम्।**
**तस्मादिदं महादेवि गोपालेनैव भाषितम्॥**[22]
**दुर्वाससो मुनेर्मोहे कार्तिक्यां रासमण्डले।**
**ततः पृष्टवती राधा सन्देहभेदमात्मनः॥**[23]

अस्मिन् स्थले रसशास्त्रोक्तः 'रासोत्सवः' मुख्यप्रतिपाद्यो वर्तते। 'रासमण्डले' इत्यस्य व्याख्यानावसरे कार्तिक्याः रासक्रीडायाः औचित्यं निरूपितम्। [13]साहित्यशास्त्रे रासः शृङ्गाररसस्य चरमोत्कर्षः मन्यते । आचार्याः अत्र 'सन्देहभेदम्' इत्यस्य 'सन्देहविशेषं' इति व्याकुर्वन्तः काव्यगतां जिज्ञासावृत्तिं भावध्वनित्वेन प्रतिष्ठापयन्ति। रसराजस्य वचनत्वेन 'गोपालेनैव भाषितम्' इति कथनेन आप्तवाक्यत्वरूपः काव्यगुणः सिध्यति।

**श्लोकः 21-23 – निरञ्जनात्समुत्पन्नं...**

**निरञ्जनात्समुत्पन्नं मयाधीतं जगन्मयि।**
**श्रीकृष्णेन ततः प्रोक्तं राधायै नारदाय च॥**[24]
**ततो नारदतस्सर्वे विरला वैष्णवा जनाः।**
**कलौ जानन्ति देवेशि गोपनीयं प्रयत्नतः॥**[25]
**शठाय कृपणायाथ दाम्भिकाय सुरेश्वरि।**
**ब्रह्महत्यामवाप्नोति तस्माद्यत्नेन गोपयेत्॥**[26]

आचार्याः '[14]शठाय' इत्यस्य 'पुरतः प्रियमुक्त्वा यो गूढं विप्रियं करोति स शठः' इति या रसगङ्गाधरादिसम्मता नायकाभास-दोषविवेचनिका परिभाषा दत्ता, सा अतीव गम्भीरा। 'दाम्भिकाय' इत्यस्य 'परवञ्चकाय जनप्रतारणार्थं मिथ्याचारवते' इति कथनेन काव्यगत-हास्यरसोचित-धूर्तलक्षणं सूचितम्। अत्र वाक्यविन्यासे 'चतुर्थी पञ्चम्यर्थे' इति व्याकरणनियमं योजयित्वा अपि गद्यस्य प्राञ्जलतां निर्दुष्टता च आचार्यचरणाः सर्वथा रक्षन्ति, यत्र कुत्रापि कृत्रिमाभासः न दृश्यते।

एवं रूपेण रामानुजताताचार्यवर्याः अस्मिन् गोपालसहस्रनामस्तोत्रे स्वकीयां साहित्यशास्त्रधिषणां प्रादर्शयन् इति गवेषकैः सर्वैः विज्ञाय एवमेव आचार्याणां व्याख्यानेषु इतोपि अनुसन्धानं विधाय कृतार्थाः भवन्तु इति शम्।

**सन्दर्भग्रन्थसूची**


1.महामहोपाध्याय-रामानुजताताचार्य-स्मरणिका,राष्ट्रियसंस्कृत-विद्यापीठम्, तिरुपतिः, 2017, पृ. 12-15।

2 *Sanskrit Scholars of the 20th Century*, French Institute of Pondicherry, 2014, Vol. 3, p. 89.

3. एन्. एस्. रामानुजताताचार्यः, विवृतिः - ज्ञापकसङ्ग्रहव्याख्या, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, 2002, भूमिकाभागः।

4 Bhāṭṭatantrarahasya of Khaṇḍadeva with Sāraprakāśikā of N.S. Ramanuja Tatacharya, RSVP, Tirupati, 2015, Introduction, p. ix.

5 भगवद्गुणरत्नपेटिका (गोपालसहस्रनामभाष्यम्), टी.टी.डी. प्रकाशनम्, तिरुपतिः, 1976, श्लोकः 1, पृ. 2।

6. भगवद्गुणरत्नपेटिका (गोपालसहस्रनामभाष्यम्), टी.टी.डी. प्रकाशनम्, तिरुपतिः, श्लोकः2, पृ. 4।

7. मम्मटभट्टकृतः काव्यप्रकाशः, दशमः उल्लासः (पुनरुक्तवदाभासप्रकरणम्)।

8 भगवद्गुणरत्नपेटिका, श्लोकः5, पृ. 7।

9. भगवद्गुणरत्नपेटिका, श्लोकः 9, पृ. 11।

10 रूपगोस्वामिकृतः उज्वलनीलमणिः, नायकप्रकरणम्।

11 विश्वनाथकविराजकृतः साहित्यदर्पणः, तृतीयः परिच्छेदः (शृङ्गारवर्णन-प्रकरणम्)।

12. भगवद्गुणरत्नपेटिका, श्लोकः 18, पृ. 18।

13. श्रीमद्भागवतमहापुराणम्, दशमस्कन्धः, रासपञ्चाध्यायी।

14. जगन्नाथपण्डितराजकृतः रसगङ्गाधरः, प्रथमाननम् (नायक-निरूपणप्रकरणम्)।


**पाद टिप्पणी -**

1. काव्यालङ्कारः 1.12
2. गो.स.स्तो-1
3. गो.स.स्तो-2
4. गो.स.स्तो-3
5. गो.स.स्तो-4
6. गो.स.स्तो-5
7. रा. 6.9.33
8. गो.स.स्तो-6
9. गो.स.स्तो-7
10. गो.स.स्तो-8
11. गो.स.स्तो-9
12. गो.स.स्तो-10
13. गो.स.स्तो-11
14. गो.स.स्तो-12
15. गो.स.स्तो-13
16. गो.स.स्तो-14
17. गो.स.स्तो-15
18. भा. 10-3-32
19. गो.स.स्तो-16
20. गो.स.स्तो-17
21. गो.स.स्तो-18
22. गो.स.स्तो-19
23. गो.स.स्तो-20
24. गो.स.स्तो-21
25. गो.स.स्तो-22
26. गो.स.स्तो-23